# वर्णधर्मानुशीलनम्


**काशीराजपोखेलः (विद्यावारिधिः)**

सहप्राध्यापक : धर्मशास्त्रम्

नेसंवि, विश्वविद्यालय विद्यापीठम्, बेलझुन्डी, दाङः, नेपाल

Email : kashirajpokhrel@gmail.com


*https://doi.org/10.3126/haimaprabha.v21i01.44832*


**सारसङ्क्षेपः**

*ब्राह्मणाद्याश्चत्वारो वर्णाः सन्ति । वर्णव्यवस्थाया वर्णनं वेदस्मृतिपुराणादिषु ग्रन्थेषु सर्वत्र विहितमुपलभ्यते । गृहस्थाश्रमवर्तीनां वर्णानां मध्ये ब्राह्मणानां साङ्गस्य वेदस्याध्यापनाध्ययने तथा यजनयाजने, दानप्रतिग्रहौ चेत्येतानि षट् कर्माणि शास्त्रेषु निरूपितानि सन्ति । तासु कर्मसु याजनाध्यापनप्रतिग्रहादीनि त्रीणि कर्माणि ब्राह्मणानां जीवनार्थानि मन्यन्ते । एवं वेदाध्ययनयजनदानादीनि त्रीणि कर्माणि ब्राह्मणानामिव क्षत्रियाणामपि कर्तव्यत्वेन निर्दिष्टानि सन्ति । अध्यापनयाजनप्रतिग्रहाख्यानि त्रीणि कर्माणि क्षत्रियाणां कृते निषिद्धानि मन्यन्ते । क्षत्रियाणां वृत्त्यर्थं धर्मार्थञ्च प्रधानं कर्म प्रजापालनमेव निर्दिष्टमस्ति । एवं वैश्यस्य यागाध्ययनदानानि कुसीदकृषिवाणिज्यपशुपालनानि च कर्माणि वृत्त्यर्थानि मन्यन्ते । शूद्रस्य तु धर्मार्थं वृत्त्यर्थञ्च प्रधानं कर्म द्विजातीनां परिचर्यैव धर्मशास्त्रकारैर्मन्यते । अनेन प्रकारेण शास्त्रोक्तकर्मणा जीवितुमशक्नुवन्नापादि धर्मशास्त्रे आपद्धर्मस्य व्यवस्था विहिता वर्तते । तत्र चापदि ब्राह्मणः क्षत्रियकर्मणा, क्षत्रियो वैश्यकर्मणा तथा वैश्योऽपि शूद्रकर्मणा व्यवहर्तुं शक्नोति । एवं शुद्रोऽपि द्विजातीनां सेवया जीवितुमशक्नुवन्नापदि विविधशिल्पकर्मभिर्जीवेदिति व्यवस्था विहिता वर्तते । वर्णेषु च जातिव्यवस्था प्रदर्शिता वर्तते । तत्र वर्णेषु जातानां द्वादशानां पुत्राणां मध्ये शास्त्रोक्तविवाहविधिमनुसृत्य विवाहितसवर्णकन्यायां जात एक एवौरसः पुत्रः सवर्णः सजातीयश्च मन्यते । वर्णानामनुलोमविवाहेषु क्रमिकरूपेण मूर्धावसिक्त-अम्बष्ठ-निषाद-माहिष्य-उग्र-करणाख्याः षडनुलोमजाः पुत्रा जायन्ते । धर्मशास्त्रे प्रतिलोमविवाहस्य विधिर्नास्ति । तथापि प्रतिलोमजाः सूत-वैदेहक-चण्डाल-मागध-क्षत्राऽयोगवाख्याः षट् पुत्रा तत्रापि भवन्ति । संकीर्णजातीनां परस्परकन्यासु जाताःपुक्कस-कुक्कुटक-क्षेत्ता-श्वपाक-वेण-सैरिन्ध्र-मैत्रेयक-मार्गव-चर्मकार-अन्ध्र-मेद-सोपाक-अन्त्यवसायी-पाण्डुसोपाक-आहिण्डिकादयो विविधाः पुत्रा भवन्ति । तेषां सर्वेषां जात्यन्तरजातानां जातीनां कर्माणि च प्रतिपादितानि सन्ति । द्विजातयश्चोपनयनादिक्रियालोपेन यजनाध्ययनप्रायाश्चित्तादीनाञ्चाभावेन शनैः शनैः शूद्रतां गच्छन्ति । तेषु च पौण्ड्रक-चौड्र-द्रविड-काम्बोज-यवन-शक-पारद-पल्हव-चीन-किरात-दरद-खसाः क्रियालोपादिना शूद्रत्वमापन्ना मन्यन्ते । तेषां सर्वेषां संक्षिप्तविवरणमध्ययनेऽस्मिन् समुपस्थापितमस्ति । तत्र च गृहस्थानां वर्णानां प्राणयात्रार्थं दायाद्याः सप्त धनागमा धर्म्या मन्यन्ते । तेषां जीवनार्थं विद्याशिल्पादयो दश जीवनहेतवश्च निर्देशिताः सन्ति ।*



**शब्दकुञ्जी**

प्रतिग्रहः, प्रतिलोमजाः, श्वपाकः, श्ववृत्तिः, पौण्ड्रकः ।


## विषयपरिचयः

सृष्ट्यादौ हिरण्यगर्भरूपेणावस्थितेन परमात्मना वेदशब्देभ्य एव स्थावरजङ्गमादीनां विविधानां प्राणीनां निर्माणक्रमे ब्राह्मणादीनां चतुर्णां वर्णानां भूतस्य भव्यस्य भविष्यतश्च सकलस्य वस्तुजातस्य

निर्माणं वेदशब्देभ्य एव विहितम् । तेन जगत्सृष्टिर्वेदपूर्विकैव मन्यते । अभ्युदयनिःश्रेयससिद्धिहेतुकस्य धर्मस्याधारग्रन्थो वेदः सर्वेषां मानवानां देवानां पितृणामपि सनातनं चक्षुरेव मन्यते। तस्य वेदस्य स्मरणादेव महर्षिभिर्धर्मशास्त्राणां रचना विहिता । सर्वेषां मानवानां संरक्षणार्थं सर्वप्रथमं वेद एव चतुर्णां वर्णानां व्यवस्था विहिता दृश्यते । वेदमनुसृत्य धर्मशास्त्रपुराणरामायणमहाभारतादिषु वैदिकग्रन्थेषु वर्णव्यवस्थायाः वर्णनं विहितमवलोक्यते। तेषामेव वैदिकग्रन्थानामाधारेण वर्तमानावस्थायामपि लोके वर्णव्यवस्था प्रचलिता मन्यते ।

अस्मिन् शीर्षके विहितमध्ययनञ्च तेषामेव धर्मशास्त्रसम्बद्धानां मन्वादीनां वैदिकग्रन्थानामाधारेण विहितमस्ति । एवं ब्राह्मणक्षत्रियवैश्यशूद्रादीनां चतुर्णां वर्णानां तथा वर्णेषु सम्बद्धानां विविधानां वर्णसङ्करजातीनाञ्च कर्तव्याकर्तव्यादीनां विषयाणां निरूपणमत्र विहितं वर्तते । अस्मिन् विषये विद्वद्भिः सामान्यमध्ययनं विहितं दृश्यते। तेषां मध्ये पाण्डुरङ्ग वामन काणेमहोदयेन "धर्मशास्त्र का इतिहास" (भाग-१) (ई.१९८०) इत्याख्यग्रन्थस्य २६४ पृष्ठे "आश्रम" शीर्षके ब्रह्मचर्यादीनामाश्रमाणां वर्णनं विहितमस्ति। तत्र वर्णाश्रमव्यवस्थायाः स्वरूपं वैदिकग्रन्थानामाधारेण प्रतिपादितं दृश्यते ।

२६६-२६७ पृष्ठे काणेमहोदयेन वर्णाश्रमधर्मस्य स्वरूपप्रतिपादनक्रमे ब्राह्मणादीनां वर्णानां विभाजनस्यार्थो सु-समाजनिर्माणार्थे विहितः । आश्रमनिर्माणस्य प्रयोजनं मानवजीवनस्य धर्मार्थकाममोक्षप्रभृतीनां पुरुषार्थानामुपलब्धये विहितं दृश्यते । अत्र वैदिकग्रन्थेषु प्रतिपादिताया वर्णाश्रमव्यवस्थाया महत्त्वं विविधशास्त्रोक्तपथा प्रदर्शितमस्ति ।

हरिगोपालेन "भारतोदयः"(ई.२०१२) पत्रिकायाः १८-१९ पृष्ठे "वैदिकवर्णव्यवस्थाया वैज्ञानिक आधारः" इति शीर्षकमादाय वैदिकवर्णव्यवस्थाया वर्णनं संक्षिप्तरूपेण विहितं दृश्यते । तत्र प्रमुखरूपेण वर्णव्यवस्थाया वैज्ञानिकपक्षस्य स्वरूपप्रकाशनकार्यं कृतमवलोक्यते ।

उदयराजसुवेदिना "मेधा" (सं.२०७८) पत्रिकायाः १६ पृष्ठे "वाल्मीकिरामायणगतवर्णाश्रमव्यवस्थाया विश्लेषणम्" इति शीर्षकमनुसृत्य वर्णाश्रमव्यवस्थाया वर्णनं विहितं दृश्यते । तत्र तेन वाल्मीकिरामायणे प्रतिपादिताया वर्णाश्रमव्यवस्थायाः स्वरूपस्य विवरणं संक्षिप्तरूपेण प्रकाशितं वर्तते ।

वर्णव्यवस्थायाः प्रतिपादनं सर्वप्रथमं वेदेषु विहितमस्ति । वेद-ब्राह्मण-कल्प-स्मृतीनां परम्परया वर्तमानकालपर्यन्तमस्य धर्मस्य प्रभावो दृश्यते। पुराण रामायणमहाभारतादीनाञ्च धर्मशास्त्रेषु सम्बन्धो वर्तते। अष्टादशपुराणेषूपपुराणेषु च वर्णव्यवस्थाया विशिष्टं वर्णनमुपलभ्यते । श्रीमद्भागवतरामायणमहाभारतेषु ग्रन्थेषु राम-कृष्ण प्रभृतीनां महापुरुषाणामपि वर्णव्यवस्थायां विहितस्य धर्मस्य वर्णनं विद्यते । तेषामेव ग्रन्थानामाधारेण वैदिककालादारभ्य वर्तमानकालपर्यन्तमस्य धर्मस्यानुकरणं क्रियते । अस्यामेव पृष्ठभूमौ अस्य विषयस्याध्ययनं विहितमस्ति ।

अस्माकमार्यावर्तदेशे वैदिककालादेव वर्णव्यवस्थायाः परम्परा प्रचलिता दृश्यते । वर्णधर्मस्य वर्णनं वेदस्मृतिपुराणेषु सर्वत्र विहितमुपलभ्यते। तथापि वर्तमानाव्यवस्थायां सामाजिकक्षेत्रे वर्णव्यवस्थाया महत्त्वप्रकाशनं समुचितरूपेण केनापि विहितं न दृश्यते । अस्य विषयस्याध्ययनाभावेन मानवसभ्यतायां दृश्यमानाः समस्याः सूत्ररूपेणात्र समुपस्थापिताः सन्ति । तेषां समस्यानां समाधानाय वर्णव्यवस्थायाः स्वरूपस्य परिशीलनं, वैदिकग्रन्थेषु प्रतिपादिताया वर्णव्यवस्थाया विवेचनं, वर्णान्तर्गतानां विविधानां जातीनां स्वरूपप्रकाशनञ्चात्र विहितं वर्तते ।

## अध्ययनविधिः

अध्ययनेऽस्मिन् पुस्तकालयेषु विविधस्थानेषु च समुपलब्धानामध्ययनसामग्रीणां विषयसम्बद्धविदूषां परामर्शग्रहणपूर्वकं सङ्कलनं विहितम् । अत्र विषयस्याध्ययनसीमायां वेद, श्रौतसूत्रम्, धर्मशास्त्रम्, गीता, पुराणग्रन्थाश्च सन्ति। अध्ययनस्य क्षेत्रे मनु-याज्ञवल्क्यपराशराणां स्मृतयो विद्यन्ते। तेषां सम्बद्धग्रन्थानामाधारेण तोलनविवेचनविश्लेषणादीनामध्ययनविधीनामवलम्बनं विधाय सम्बद्धविषयस्याध्ययनं निष्कर्षोपस्थापनञ्चात्र विहितमस्ति ।

अस्य विषयस्याध्ययनं पुस्तकालयेषु विविधस्थानेषु च समुपलब्धानां धर्मशास्त्रसम्बद्धानां वैदिकग्रन्थानां सङ्कलनं विधाय तेषामाधारेण तोलनविवेचनविश्लेषणादीनामध्ययनविधीनां प्रयोगेण विहितमस्ति ।

## सैद्धान्तिकापर्याधारः

वेदादन्यमूलानि पुरुषनिर्मितानि शास्त्राणि पौरुषेयत्वाद्यथा समुत्पद्यन्ते तथैव कालान्तरे चाशु नश्यन्ति । परन्तु धर्मशास्त्रेषु ब्राह्मणादीनां वर्णानां कृते प्रतिपादिता व्यवस्था "ब्राह्मणोऽस्य मुखमासीत्" इत्यादिवेदवाक्य-प्रमाणाद्वेदादेव प्रचलिता मन्यते। धर्मस्य वेदमूलत्वात् ब्राह्मणादीनां वर्णानां धर्मा अपि वेदादेव प्रसिद्ध्यन्ति । अत्र वेदस्मृतिपुराणादीनां ग्रन्थानामध्ययनं विधाय वर्णव्यवस्थायाः स्वरूपमुपपादितमस्ति । अध्ययनेऽस्मिन् पूर्वकार्याणामध्ययनं विधाय विविधानां धर्मशास्त्रसम्बद्धानां वैदिकग्रन्थानामाधारेण व्याख्या-विवेचन-तोलनादीनां विश्लेषणविधीनां तथा पादटिप्पण्यादीनां शोधप्रविधीनाञ्चावलम्बनं विहितं वर्तते । तेषां विविधानामाधुनिकानामध्ययनविधीनां सैद्धान्तिकाधारेणात्र विषयस्यास्य सम्पादनं विहितं विद्यते ।

## विश्लेषणपरिणामः

अत्र वर्णधर्मस्यानुशीलनार्थं वेदादारभ्य स्मृतिपुराणादीनां तथा निबन्धग्रन्थपर्यन्तानां विविधानां धर्मशास्त्रसम्बद्धानां विषयाणामध्ययनं विहितमस्ति । विविधानां धर्मशास्त्रसम्बद्धग्रन्थानामाधारेण शीर्षकसम्बद्धानां वैदिकवर्णव्यवस्था, वर्णानां वृत्तयः, वर्णानां शास्त्रोक्तकर्माणि, वर्णेषु जातिव्यवस्था, जात्यन्तरजातानां कर्माणि तथा वर्णानामापद्वृत्तिप्रभृतीनामुपशीर्षकाणामत्र व्याख्या, विवेचना च विहिता वर्तते । तेषामेव विषयाणां तोलन-विवेचन-विश्लेषणादीनां विश्लेषणविधीनामाधारेण विश्लेषणं विधाय वर्णव्यवस्थायाः स्वरूपस्योपस्थापनमत्र विहितमस्ति ।

## वैदिकपरम्परायां वर्णव्यवस्था

वर्णशब्दस्य प्रयोगो व्यवहारे शास्त्रे च नील-रक्त हरित-पीत-कृष्णादिषु तथा ब्राह्मण-क्षत्रिय-वैश्य-शुद्रादिषु मानवजातिविशेषेषु च विहितो दृश्यते। मानवेषु प्रयुक्तस्य वर्णशब्दस्यार्थो ब्राह्मणादि वर्णव्यवस्थाया वर्तते । ऋगादिवेदानां विविधभागेषु वर्णशब्दस्य प्रयोगो मानवानां वर्णविभागेषु विहितोऽस्ति ।

"अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।
उभौ वर्णावृषिरूग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥" (ऋग्वेदः, २०६३,१।१७९।६)

तैत्तिरीयसंहितायां ब्राह्मणानां वर्णनं प्रत्यक्षदेवस्वरूपे विहितं वर्तते । परोक्षरूपाणां देवानां यजनादिकं कार्यमपि ब्राह्मणाधारेण भवतीति विषयस्य प्रतिपादनं तत्र विद्यते । "परोक्षं वा अन्ये देवा इज्यन्ते प्रत्यक्षमन्ये यद्यजते य एव देवाः परोक्षमिज्यन्ते तानेव तद्यजति तदन्वाहार्यमाहरत्येते वै देवाः

प्रत्यक्षं यद् ब्राह्मणास्तामेव तेन प्रेणात्य-थो दक्षिणैवास्यैषाऽथो यज्ञस्यैव छिद्रमपि दधाति यद्वै यस्य क्रूरं यद्विलिष्टं तदन्वाहार्यणाऽन्वाहरति तदन्वाहार्यस्यान्वा- हार्यत्वं देवदूता वा एते यदृत्विजो यदन्वाहार्यमाहरति देवदूतानेव प्रीणाति" (तैत्तिरीयसंहिता, १९८३, १।७।३) एवं ब्राह्मणादीनां वर्णानां निर्माणप्रयोजनं तेषां कार्यक्षेत्रञ्च वेदेषु प्रतिपादितमुपलभ्यते । "प्रजापति रकामयत प्र जायेयेति ।

स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथंतरं साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात् ते मुख्या मुखतो ह्यसृज्यन्तो रसो बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवताऽन्वसृज्यत त्रिष्टुप छन्दो बृहत् साम राजन्यो मनुष्याणामविः पशूनां तस्मात् ते वीर्यावन्तो वीर्याद्ध्यसृज्यन्तं मध्यतः सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपं साम वैश्यो मनुष्याणां गावः पशूनां तस्मात् त आद्या अन्नधानाद्ध्यसृज्यन्त तस्माद्भुयांसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त पत्त एकविंशं निरमिमीत तमनुष्टुप् छन्दोऽन्वसृज्यत वैराजं साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात् तौ भूतसङ्क्रामिणावैश्वश्च शूद्रश्च तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो न हि देवता अन्वसृज्यत तस्मात् पादावुप जीवतः पत्तो ह्यसृज्येतां" (तैत्तिरीयसंहिता, १९८३, ७।१।१)

ब्राह्मणादीनां वर्णानां वर्णनं वेदब्राह्मणोपनिषदादिषु वैदिकग्रन्थेषु लौकिकग्रन्थेषु च सर्वत्र विद्यते । अनादिकालादेव प्रवर्तिता वर्णव्यवस्था मानवव्यवहारे च परम्परया समागता दृश्यते । अस्य विषयस्य निरूपणम् ब्राह्मणग्रन्थेनापि विहितमस्ति । "चत्वारो वै वर्णाः । ब्राह्मणो राजन्यो वैश्यः शूद्रो न हैतेषामेकश्चन भवति वः सोमं वमति स यद्धैतेषामेकश्चित्स्यात्स्यद्धैवं प्रायाश्चित्तिः" । (शतपथब्राह्मणम्, २०५४, ५।४।६।९ )

सृष्ट्यादौ ब्रह्मणा भूरादीनां लोकानां विवृद्ध्यर्थं सर्वेषां भूतानां संरक्षणार्थञ्च मुखबाहूरूपादेभ्यो ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां निर्माणं विहितम् ।

लोकानां तु विवृद्ध्यर्थं मुखबाहूरूपादतः ।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ॥ (मनुः, २०४९, १।३१)

वेदेऽपि मुखबाहूरूपज्जानां ब्राह्मणादीनां चतुर्णां वर्णानां वर्णनमुपलभ्यते । "ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः । ऊरूतदस्ययद्वैश्यः पद्भ्यांशूद्रोऽजायत ॥" (ऋग्वेद, २०६३, १०।९०।१२) श्रीमद्भागवतमहापुराणे वर्णानामुत्पत्तिर्वैराजात् पुरुषात् कथिता वर्तते ।

विप्रक्षत्रियविट्शूद्रा मुखबाहूरूपादजाः ।

वैराजात् पुरुषाज्जाता य आत्माचारलक्षणाः ॥ (श्रीमद्भागवतमहापुराणम्, २०७२, ११।१७।१३)

एवं ब्राह्मणादीनां वर्णानां रचना गुणकर्मविभागशो विहिता दृश्यते । अस्य विषयस्य निरूपणं भगवता श्रीकृष्णेन गीतायामपि विहितं वर्तते ।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ (श्रीमद्भगवद्गीता,२०५८, ४।१३)

श्रौतसूत्रादिषु वैदिकग्रन्थेषु च ब्राह्मणादीनां चतुर्णां वर्णानां वर्णनमुपलभ्यते । "चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः" । (सत्याषाढविरचितं श्रौतसूत्रम्, १९३२, २६।१।४)

वैदिकधर्मे सर्वेषां मानवानां जीवनं सुसंरक्षितं मन्यते । तत्र च सर्वेषां वर्णानां कार्याणि पृथक् रूपेण प्रतिपादितानि सन्ति । तेषां वर्णधर्माणामाधारेण जगति धर्मसंस्थापनाय चतुर्णां वर्णानां निर्माणं विधाय भगवता ब्रह्मणा वर्णव्यवस्थायाः स्थापना विहिता दृश्यते । तेन सर्वेषां वर्णानामाचारो धर्मसंरक्षको मन्यते ।

चतुर्णामपि वर्णानामाचारो धर्मपालकः ।

आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥ (पाराशरः, २०२५, १।३७)

वर्णाश्रमधर्मो सनातन वैदिककालादेव शिष्टाचारत्वेन समागतो विद्यते। श्रुतिस्मृतिभ्यां प्रतिपादितोऽयं धर्मः सर्वैः साधुभिर्जनैः पालनीयो मन्यते । मानवानां संरक्षणार्थं युगादिषु चास्य वैदिकवर्णाश्रमधर्मस्य शिष्टैः सञ्चालनं सवर्द्धनञ्च विधीयते ।

तस्मात्स्मार्तः स्मृतो धर्मो वर्णाश्रमविभागशः ।
एवं वै द्विविधो धर्मः शिष्टाचारः स उच्यते ॥
तैः शिष्टैश्चालितो धर्मः स्थाप्यते यै युगे युगे ।
त्रयी वार्ता दण्डनीतिः प्रजावर्णाश्रमेप्सया ॥
श्रुतिस्मृतिभ्यां विहितो धर्मो वर्णाश्रमात्मकः ।
शिष्टाचारप्रवृद्धश्च धर्मोऽयं साधुसम्मतः ॥ (मत्स्यमहापुराणम्, २०७३, १४५।३३, ३६, ५२)

श्रुतिस्मृतिपुराणेषु सर्वत्र सनातनवैदिकधर्मस्याधारेण सृष्टिस्वरूपवर्णनं विहितमुपलभ्यते । शिवमहापुराणेऽपि सगुणब्रह्मस्वरूपस्य परमात्मनः शरीरादुत्पन्नानां ब्राह्मणादीनां भूतानामुत्पत्तिविषयस्य निरूपणं विहितमस्ति ।

द्यां मर्द्धानं तस्य विप्रा वदन्ति
खं वै नाभिं चन्द्रसूर्यौ च नेत्रे ।
दिशः श्रोत्रे चरणौ च क्षितिं च
सोऽचिन्त्यात्मा सर्वभूतप्रणेता ॥
वक्त्रात्तस्य ब्राह्मणाः संप्रसूताः
तद्वक्षसः क्षत्रियाः पूर्वभागात् ॥
वैश्या ऊरूभ्यां तस्य पद्भ्यां च शूद्राः
सर्वे वर्णा गात्रतः संप्रसूताः ॥

(श्रीशिवमहापुराणम्, वायवीयसंहिता (पूर्वखण्डः), २०७४, ७६-७७)

वर्णाश्रमव्यवस्था धर्मसूत्रकाले पूर्णरूपेण विकसिता दृश्यते । तत्र वर्णधर्मस्य विशिष्टं वर्णनं महर्षिबौधायनेन विहितमुपलभ्यते। "चत्वारो वर्णा ब्राह्मणक्षत्रियविट्शूद्राः"(बौधायनः, २०२९, १।१५।८।१) तत्र सूत्रकारेण सामाजिक- व्यवहारे च वर्णानां कर्तव्याकर्तव्यादिनां विषयाणां व्यवस्था विहिता दृश्यते । "चत्वारो वर्णाः पुत्रिणः साक्षिणस्युरन्यत्र श्रोत्रियराजन्यप्रव्रजितमानुष्यहीनेभ्यः" (बौधायनः, २०२९, १।१९।१०।१६)

जगति जातानां सर्वेषां भूतानां चतुर्णां वर्णानाञ्च हितार्थाय वेदादीनां चतुर्दशशास्त्राणां निर्माणं महर्षिभिर्विहितमस्ति । महर्षिणा शङ्खेनापि शास्त्रनिर्माणप्रयोजनं तत्रैव शङ्खस्मृतौ प्रतिपादितं विद्यते ।

स्वयम्भूवे नमस्कृत्य सृष्टिसंहारकारिणे ।
चातुर्वर्ण्यहितार्थाय शङ्खःशास्त्रमथाकरोत् ॥ (शङ्खः, २०७८, १।१)

वस्तुतो वर्णव्यवस्था लोकसञ्चालनार्थं चतुर्णां वर्णानामाधारेण निर्मिता वैदिकी व्यवस्था वर्तते । या व्यवस्था सनातनकालादेव युगयुगान्तरेषु प्रचलिता दृश्यते । वर्णव्यवस्थाया आचारग्रन्थो वेदो महाप्रलयेषु स्वतः परमेश्वरे प्रलियते पुनः सृष्टिकाले परमेश्वरश्वासमार्गेण वेदानामिव तेषां वर्णधर्मप्रतिपादितानां वैदिकमन्त्राणामपि समुत्पत्तिर्जायते । अनादिकालादेव आर्यावर्तान्तर्गतेऽस्मिन् ब्रह्मावर्तक्षेत्रे ब्रह्मणः सृष्टिक्रमः प्रचलितो दृश्यते ।

## वर्णानां वृत्तयः

ब्राह्मणादीनां वर्णानां जीवनार्थं धर्मशास्त्रे विविधानां वृत्तीनां व्यवस्था विहिता वर्तते । तत्र गृहस्थाश्रमेषु स्थितानां वर्णानां कृते षण्णिवर्तनी, कोद्दाली, ध्रुवा, सम्प्रक्षालनी, समूहा, पालिनी, सिलोञ्छा, कापोता, सिद्धेच्छेति नव वृत्तयः प्रसिद्धाः सन्ति । तासामेव वृत्तीनामन्या वान्याख्या दशमी वृत्तिवर्तते । तासां विद्वद्भिर्विविधरूपा व्याख्या विहिता दृश्यते ।

## षण्णिवर्तनी

निवर्तनं नाम भूम्याः (अकृष्टक्षेत्रस्य) कर्षणमुक्तम् । षडेव निवर्तनानि करोतीति षण्णिवर्तनी । कृषौ संलग्ना जना शास्त्रनिर्दिष्टपथा षट्संख्याविशिष्टानि निवर्तनान्यकृष्टक्षेत्राणि समापादयन्ति । अत्र समुल्लिखितं विधेः स्वरूपं महर्षिणा बौधायनेन प्रतिपादितम् विद्यते । “षडेव निवर्तनानि निरूपहतानि करोति स्वामिने भागमुत्सृजत्यनुज्ञातं वा गृह्णाति । प्राक्प्रातराशात्कर्षी स्यादस्यूतनासिकाभ्यां समुष्काभ्यामतुदन्नारया मुहुर्मुहुरभ्युच्छन्दयन् । एतेन विधिना षण्णिवर्तनानि करोतीति षण्णिवर्तनी” । (बौधायनः, २०२९, ३।२।२।२)

## कौद्दाली

कुद्दालं नाम काष्ठसंयोजितमयोमुखं बीजवपनार्थे निर्मितं खननपात्रं खनित्रं वा । नेपालदेशे ‘कोद्दाली’ इत्यस्य प्रयोगो मातृभाषायां “कोदाली” इति नाम्ना विधीयते । कोद्दाली शब्दस्य विविधा व्याख्या च विहिता दृश्यते । “कौद्दालीति जलाभ्यासे कुद्दालेन वा फालेन वा तीक्ष्णकाष्ठेन वा खनति बीजान्यावपति कन्दमूलफलशाकौषधीर्निष्पादयति । कुद्दालेन करोतीति कौद्दाली” । (बौधायनः, २०२९, ३।२।२।३)

## ध्रुवा

प्राणयात्रामात्रप्रयोजनेन विहिता निश्चयात्मिका भिक्षाटनवृत्तिर्ध्रुवा । “वृत्तेर्वृत्तेरवार्तायां तयैव तस्य ध्रुवं वर्तनाद् ध्रुवेति परिकीर्तिता” । (बौधायनः, २०२९, ३।२।२।७ )

## सम्प्रक्षालनी

वृत्त्यर्थं यत्र बीजवपनं निक्षेपणञ्च विधाय धनसञ्चयो न क्रियते, अहरेव भाजनानि सम्प्रक्षाल्य न्युब्जानि करोतीति सम्प्रक्षालनी ।

“उत्पन्नानामोषधीनां प्रक्षेपणं निक्षेपणं नास्ति निचयो वा भाजनानि सम्प्रक्षाल्य न्युब्जतीति सम्प्रक्षालनी” । (बौधायनः, २०२९, ३।२।२।८)

**समूहा**

अनिषिद्धस्थानेषु यत्र यत्रान्नादयः समुपलभ्यन्ते तत्र तत्र गत्वा समूहन्या समूह्य लब्धान्नेन वर्तयतीति समूहा । "अवारितस्थानेषु पथिषु वा क्षेत्रेषु वाऽप्रतिहतावकाशेषु वा यत्र यत्रौषधयो विद्यन्ते तत्र तत्र समूहन्या समूह्य ताभिर्वर्तयतीति समूहा" । (बौधायनः, २०२९, ३।२।२।९)

**पालनी**

सज्जनेभ्यो तुषविहीनतण्डुलग्रहणेन पालयतीति पालनी । "पालनीत्यहिंसिकेत्येवेदमुक्तं भवति । तुषविहीनांस्तण्डुलानिच्छति सज्जनेभ्यो बीजानि वा पालयतीति पालनी" । (बौधायनः, २०२९, ३।२।२।१०)

**सिलोञ्छा**

अनिषिद्धस्थानेषु चैकैकं धान्याद्यन्नकणिशमुञ्छयित्वा समये समये सिलैर्वर्तयतीति सिलोञ्छा । "अवारितस्थानेषु पथिषु वा क्षेत्रेषु वाऽप्रतिहतावकाशेषु वा यत्रयत्रौषधयो विद्यन्ते तत्रतत्रैकैकं कणिशमुञ्छयित्वा काले काले सिलैर्वर्तयतीति सिलोञ्छा" । (बौधायनः, २०२९, ३।२।२।११)

**कापोता**

अनिषिद्धस्थानेषु यत्र यत्रान्नानि विद्यन्ते तत्र तत्र गत्वा कपोतचञ्चुभ्यामिवाऽङ्गुलिभ्यामेकैकमन्नकणमादाय कपोतवद्वर्तयतीति कापोता कथिता ।

"अवारितस्थानेषु पथिषु वा क्षेत्रेषु वाऽप्रतिहतावकाशेषु वा यत्र यत्रौषधयो विद्यन्ते तत्र तत्राऽऽङ्गुलिभ्यामेकैकामोषधिमुञ्छयित्वा सन्दर्शनात् कपोतवदिति कापोता"। (बौधायनः, २०२९, ३।२।२।१२)

**सिद्धेच्छा**

वृद्धत्त्वेन परिक्षीणः सिद्धं पक्वान्नमिच्छतीति सिद्धेच्छा ।

"वृत्तिभिश्श्रान्तो वृद्धत्वाद्धातुक्षयाद्वा सज्जनेभ्यः सिद्धमन्नमिच्छतीति सिद्धेच्छा" । (बौधायनः, २०२९, ३।२।२।१३)

**वान्या**

श्यामाकजर्तिलादीनां वान्याभिः फलैर्वर्तयतीति वान्या । "वान्याऽपि वृक्षलतावल्ल्योषधीनां च तृणौषधीनां च श्यामाकजर्तिलादीनां वान्याभिर्वर्तयतीति वान्या ।" (बौधायनः, २०२९, ३।२।२।१५) तत्राऽप्युदाहरन्ति–

मृगैस्सह परिस्पन्दः संवासस्तेभिरेव च ।<br>
तैरेव सदृशी वृत्तिः प्रत्यक्षं स्वर्गलक्षणम् ॥ (बौधायनः, २०२९, ३।२।२।१६)

गृहस्थवृत्तीनां लक्षणप्रकाशनक्रमे याभिर्वृत्तिभिश्शरीरयात्रा वर्तते ता वृत्तयः कथिताः । अनापदि वर्णेषु द्विजादिभिर्विशेषेणाद्रोहेणाल्पद्रोहेण वा जीवनोपायोऽवलम्बनीयः । तत्र शास्त्रोक्तदिशा कुटुम्बसंवर्धननित्यकर्मानुष्ठानादिनिमित्तकमेवार्थसंग्रहमगर्हितैः कर्मभिः कूर्यात्, न तु गर्हितैः ।

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।<br>
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥

यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ॥ (मनुः, २०४९, ४।२-३)

गृहस्थो द्विजोऽनापदि शास्त्रविहितार्जनरूपैर्भोगरहितकर्मभिर्जीवेत् । पञ्चमहायज्ञादीनामनुष्ठानं च ऋतामृतामृतप्रमृतसत्यानृतादीनां वृत्तीनामवलम्बनं विधाय कुर्यात् । विविधानां वृत्तीनां मध्ये वाणिज्यमपि ग्राह्यं भवति, परन्तु ब्राह्मणानां कृते सेवया (श्ववृत्त्या) जीवनं निषिद्धमस्ति ।

ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्या कदाचन ॥

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥ (मनुः, २०४९, ४।४-६)

गृहस्थाश्रमेषु द्विजादिभिर्धनसञ्चयः कुटुम्बपालनाय कार्यो न भोगाय । तेन धर्मशास्त्रे कुसूलधान्यकः, (मनुः, २०२९, ४।७, टीका) कुम्भीधान्यकः (मनुः, २०४९, ४।७, टीका) त्र्यहैहिको (मनुः, २०४९, ४।७, टीका) ऽश्वस्तनिकादीनां (मनुः, २०४९, ४।७, टीका) चतुर्णां गृहस्थानां ब्राह्मणानां धनसञ्चयपरिमाणस्वरूपं निर्दिष्टमस्ति । तेषु च पूर्वापेक्षा परः परः श्रेष्ठः कथितः ।

कुसूलधान्यको वा स्यात्कुम्भीधान्यक एव वा ।
त्र्यहैहिको वाऽपि भवेदश्वस्तनिक एव वा ॥
चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम् ।
ज्यायान्परः परो ज्ञेयो धर्मतो लोकजित्तमः ॥ (मनुः, २०४९, ४।७-८)

**वर्णानां शास्त्रोक्तकर्माणि**

ब्राह्मणक्षत्रियवैश्यशूद्रादीनां वर्णानां जीवनार्थानि कर्माणि च धर्मशास्त्रेषु मन्वादिभिर्ऋषिभिः प्रतिपादितानि ।

**ब्राह्मणस्य कर्माणि**

ब्राह्मणानामध्यापनाध्ययने साङ्गस्य वेदस्य तथा यजनयाजने, दानप्रतिग्रहौ चेत्येतानि षट् कर्माणि निरूपितानि । षट्सु कर्मसु याजनाध्यापनप्रतिग्रहादीनि त्रीणि कर्माणि तेषां जीवनार्थानि सन्ति ।

अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥
षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥ (मनुः, २०४९, १०।७५-७६)

शङ्खेनापि शङ्खस्मृतौ यजनयाजनदानाध्ययनाध्यापनप्रतिग्रहादीनि षडेव कर्माणि प्रतिपादितानि ।
यजनं याजनं दानं तथैवाध्यापनक्रियाम् ।
प्रतिग्रहञ्चाध्ययनं विप्रः कर्माणि कारयेत् ॥ (शङ्खः, २०७८, १।२)

एवं वासिष्ठोऽपि–"षट् कर्माणि ब्राह्मणस्य । स्वाध्यायाध्ययनमध्यापनं यज्ञो यजनं दानं प्रतिग्रहश्चेति ।"(वासिष्ठः, १९३०, २।१३-१४)

पराशरेणापि ब्राह्मणानां कृते षट्कर्मशब्दस्य प्रयोगः पराशरस्मृतौ विहितो दृश्यते । तथापि तेन षट्कर्मसु सन्ध्या, स्नानं, जपः, होमः, देवतानां पूजनं तथा वैश्वदेवपूर्वमातिथ्यमित्यादीनि क्रमिकरूपेण निरूपितानि ।

षट्कर्माभिरतो नित्यं देवताऽतिथिपूजकः ।
हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ॥
सन्ध्या स्नानं जपो होमो देवतानां च पूजनम् ।
आतिथ्यं वैश्वदेवं च षट्कर्माणि दिने दिने ॥ (पराशरः, २०२५, १।३८-३९)

भगवता कृष्णेन श्रीमद्भगवद्गीतायां ब्राह्मणादीनां वर्णानां कर्माणि तेषां स्वभावप्रभवैर्गुणैः प्रविभक्तानि सन्तीति विषयस्य वर्णनं विहितं दृश्यते । तेन वर्णेषु ब्राह्मणस्य शमः, दमः, तपः, शौचं, क्षान्ति (क्षमा), आर्जवं, ज्ञानं (वेद), विज्ञानं, आस्तिक्यादीनि कर्माणि स्वभावजानीनि तत्र प्रतिपादितानि ।

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ (श्रीमद्भगवद्गीता, २०५८, १८।४१-४१)

श्रीमद्भागवतेऽपि ब्राह्मणानां कृते ब्रह्मप्रकृतयः शमो दमस्तपः प्रभृतयो धर्माः प्रतिपादिताः सन्ति ।

शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।
मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः ॥ (श्रीमद्भागवतमहापुराणम्, २०७२, ११।१७।१६)

## क्षत्रियस्य कर्माणि

साङ्गस्य वेदस्याध्ययनयजनदानादीनि त्रीणि कर्माणि ब्राह्मणानामिव क्षत्रियाणामपि कर्त्तव्यत्वेन शास्त्रेषु प्रतिपादितानि सन्ति । तत्राध्यापनयाजनप्रतिग्रहाख्यानि यानि ब्राह्मणानां कृते विहितानि तानि त्रीणि कर्माणि क्षत्रियाणां कृते निषिद्धानि मन्यन्ते ।

त्रयो धर्मा निवर्तन्ते ब्राह्मणात्क्षत्रियं प्रति ।

अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ॥ (मनुः, २०४९, १०।७७)

क्षत्रियस्य वृत्त्यर्थं धर्मार्थञ्च प्रधानं कर्म प्रजापालनमेव कथितमस्ति । "प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्" (याज्ञवल्क्यः,२००२, १।११९) इति । क्षत्रियस्य कर्मसु शौर्यं, तेजः, धृतिः, दानं, इश्वरभावः, युद्धादिषु चापलायनादीनि स्वभावजानि कर्माणि मन्यन्ते ।

शौर्यं तेजो धृतिर्दाक्ष्यं येद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् । (पराशरः, १९१३, १।७०)

एवं श्रीमद्भागवतेऽपि क्षत्रियाणां प्रकृतयः प्रदर्शिताः सन्ति ।

तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः ।

स्थैर्यं ब्रह्मण्यतैश्वर्यं क्षत्रप्रकृतयस्त्विमाः ॥ (श्रीमद्भागवतमहापुराणम्, २०७२, ११।१७।१७)

शङ्खस्मृतौ तु क्षत्रियस्य यजनदानाध्ययनादिषु कर्मसु प्रजारक्षणमेव प्रधानं कर्म कथितमस्ति ।

दानमध्ययनञ्चैव यजनञ्च यथाविधि ।

क्षत्रियस्य तु वैश्यस्य कर्मेदं परिकीर्तितम् ॥

क्षत्रियस्य विशेषेण प्रजानां परिपालनम् । (शङ्खः, २०७८, १।३-४)

बौधायनेनापि यजनदानाध्ययनादीनि कर्माणि क्षत्रियस्य प्रतिपादितानि । तथापि तस्य प्रधानं कर्म सर्वेषां वर्णानां रक्षणमेव निष्कर्षरूपेण निरूपितं दृश्यते । 'क्षत्रे बलमध्ययनयजनदानशस्त्रकोशभूतरक्षणसंयुक्तं क्षत्रस्य वृद्ध्यै' । (बौधायनः, २०२९, १।१८।१०।३)

## वैश्यस्य कर्माणि

यागाध्ययनदानानि त्रीणि कर्माणि वैश्यस्यापि मन्यन्ते । "इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च" (याज्ञवल्क्यः, २००२, १।११८)। क्षत्रियस्य प्रजापालनमिव वैश्यस्य कुसीदकृषिवाणिज्यपशुपालनानि कर्माणि वृत्त्यर्थानि कथितानि ।

"कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतम्"। (याज्ञवल्क्यः, २००२, १।११९)

श्रीमद्भागवते दानाध्ययनजनार्थोपार्जनप्रभृतयो वैश्यस्य प्रकृतयो भवन्तीति निरूपितमस्ति ।

आस्तिक्यं दाननिष्ठा च अदम्भो ब्रह्मसेवनम् ।

आष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः ॥ (श्रीमद्भागवतमहापुराणम्, २०७२, ११।१७।१८)

एवं बौधायनधर्मसूत्रेऽपि वैश्यस्य दानाध्ययनयजनकृषिवाणिज्यपशुपालननदीनि कर्माणि प्रतिपादितानि सन्ति । 'विट्स्वध्ययनयजनदानकृषिवाणिज्यपशुपालनसंयुक्तं कर्मणां वृद्ध्यै' । (बौधायनः, २०२९, १।१८।१०।४) एवमेव पराशरस्मृतौ पराशरमुनिना वैश्यधर्मस्य प्रतिपादनं विशेषरूपेण विहितमस्ति ।

लाभकर्म तथा रत्नं गवां च परिपालनम् ।

कृषिकर्म च वाणिज्यं वैश्यवृत्तिरूदाहृता ॥ (पराशरः, १९१३, १।७१)

## शूद्रस्य कर्माणि

धर्मशास्त्रकारैः शूद्रस्य धर्मार्थं वृत्त्यर्थञ्च प्रधानं कर्म द्विजातीनां परिचर्यैव मन्यते । तत्र 'शूद्रस्य द्विजशुश्रूषा' (पराशरः, १९१३, १।१२०) इति याज्ञवल्क्यवचनेनापि द्विजातीनां शुश्रूषा शूद्रस्य प्रधानं कर्म धर्मश्चेति ज्ञायते । मनुस्मृतौ तु शूद्रस्य कर्मान्तरेभ्यः प्रकृष्टं कर्म ब्राह्मणपरिचर्यैवेति निरूपितमवलोक्यते ।

विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते ।

यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम् ॥ (मनुः, २०४९, १०।१२३)

शूद्रः प्रजापतेः पादात्सृष्टो मन्यते । तस्मादेव शूद्रस्य यज्ञयागादिषु विविधवैदिककर्मसु चाधिकारो न दृश्यते । अस्य विषयस्य निरूपणं तैत्तिरीयसंहितायां विहितं वर्तते । "पत्त एकविंशं निरमिमीत तमनुष्टुप छन्दोऽन्वसृज्यत वैराजं साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात् तौ भूतसङ्क्रामिणावश्वश्च शूद्रश्च तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो"(तैत्तिरीयसंहिता, १९८३, ७।१।१) बौधायनेनापि तैत्तिरीयसंहिताया

वैदिकमन्त्रस्याधारेण शूद्रस्य पादजन्यत्वमुपस्थाप्य शूद्रो यज्ञेऽनवक्लृप्तः कथितः । "शूद्रेषु पूर्वेषां परिचर्या पत्तो ह्यसृज्यन्तेति" (बौधायनः, २०२९, १।१८।१०।५-६) (यस्मात्प्रजापतेः पादात्सृष्टः तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः । अतो द्विजानां शुश्रूषैव शूद्रस्य धर्मः ।) श्रौतसूत्रेऽपि शूद्रस्य ब्राह्मणादीनां वर्णानां शुश्रूषैव परमो धर्मो निर्देशितो विद्यते । द्विजानामपि पूर्वस्मिन् वर्णे कृतायाः शुश्रूषाया विशिष्टं फलमुक्तं वर्तते । "शुश्रूषा शूद्रस्येतरेषां वर्णानाम् । पूर्वस्मिन्पूर्वस्मिन् वर्णे निःश्रेयसं भूयः ।" (सत्याषाढः, १९३२, २६।१।७-८)सर्वप्रकारं कृताया अपि वैश्यशुश्रूषाया मात्रयाऽपि कृता क्षत्रियशुश्रूषा बहुतरं फलं साधयति । एवं क्षत्रियशुश्रूषाया अपि ब्राह्मणशुश्रूषा निःश्रेयससाधनमतिशयेन जनयति ।) महर्षिणा शङ्खेन तु शूद्राणां कृते द्विजशुश्रूषायाः सार्धं सर्वशिल्पानि कर्माणि च प्रतिपादितानि ।

शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि चाप्यथ ।
क्षमा सत्यं दमः शौचं सर्वेषामविशेषतः ॥ (शङ्खः, २०७८, १।५)

शिवपुराणेऽपि शूद्रस्य द्विजानां शुश्रूषैव धर्मः कथितः । तत्र तस्याश्रयस्थानं शिवक्षेत्रमेव निरूपितमस्ति ।

शुश्रूषेतरवर्णानां धर्मः शूद्रस्य कथ्यते ।
उद्यानकरणं चैव मम क्षेत्रसमाश्रयः ॥ (श्रीशिवमहापुराणम्, २०७४, वायवीयसंहिता, उ.ख.,११।१७)

## वर्णेषु जातिव्यवस्था

वैदिकवर्णव्यवस्थायां जातिव्यवस्था च विहिता दृश्यते । वर्णेषु ब्राह्मणादिभ्यः सवर्णेभ्यः सवर्णासु मातृपितृसमानजातीयाः पुत्रा भवन्ति । वर्णव्यवस्थायां सामान्यरूपेण यो यज्जातीया- द्यज्जातीयामुत्पन्नः स तज्जातीय एव भवति, तथापि तत्र सवर्णजातानां कानीनगूढोत्पन्नसहोढजपौनर्भवाणां कुण्डगोलकानाञ्च सवर्णत्वं जनकद्वारेण भवति न स्वरूपेण । धर्मशास्त्रमर्यादायां तेषां वर्णजातिलक्षणाभावस्योक्तत्वाच्च तेषामसवर्णत्वमुक्तं भवति ।

सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ।
अनिन्द्येषु विवाहेषु पुत्राः संतानवर्धनाः ॥ (याज्ञवल्क्यः, २००२, १।९०)

विवाहसंस्कारात्प्रागेव पुरुषसंबन्धदूषिता वा कौमारं सवर्णं पतिं त्यक्त्वा कामतः पुनः सवर्णमन्यं पुरुषं गच्छति चेत् सा पुनर्भूः, स्वैरिणी वा कथिता वर्तते ।

अक्षता च क्षेता चैव पुनर्भूः संस्कृता पुनः ।
स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् ॥ (याज्ञवल्क्यः, २००२, १।६७)

औरसादिषु द्वादशपुत्रेषु धर्मशास्त्रोक्तविवाहविधिमनुसृत्य विवाहित-सवर्ण-कन्यायां जात एक एवौरसः पुत्रः सवर्णः सजातीयश्च कथितो विद्यते । तत्र पितृधनस्वामी चौरस एवैकः पुत्रो भवति ।

एक एवौरसः पुत्रः पित्र्यस्य वसुन प्रभुः ।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम् ॥ (मनुः, २०४९, ९।१६३)

दायग्रहणविषये च द्वादशानामौरसक्षत्रजादीनां पुत्राणां मध्ये पूर्वस्य पूर्वस्याभावे उत्तर उत्तरः पिण्डदो रिक्थहरश्च भवति । "पिण्डदोऽशहरश्चैषां पूर्वाभावे परः परः" (याज्ञवल्क्यः, २००२, ३।१३२) अत्र प्रतिपादितो

विधिः समानजातीयेषु पुत्रेष्वेव । तेन वर्णान्तर्गतानां जातीनामाधारेण धर्मशास्त्रे दायविभागनियमस्य वर्णनं विहितं दृश्यते । "सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः" (याज्ञवल्क्यः, २००२, २।१३३)

सवर्णानां तथा सजातीनां महत्त्वं धार्मिकक्षेत्रे दायविभागविषये च प्रकाशितं वर्तते । तेषां विविधानं वर्णानां जातीनां भेदनिरूपणमनुलोमादीनां प्रतिलोमादीनाञ्चाधारेण क्रियते ।

**अनुलोमजाः पुत्राः**

तत्र ब्राह्मणात्क्षत्रियायां कन्यायामुत्पन्नो मूर्धावसिक्तनामकः पुत्रो भवति, एवं वैश्यकन्यायामुत्पन्नोऽम्बष्ठः, शूद्रायामुत्पन्नो निषादो नाम पुत्रो भवति। क्षत्रियाद्वैश्यायां शूद्रायां च माहिष्योग्रौ पुत्रौ भवतः । शूद्रायां वैश्यान्दुत्पन्नः पुत्रः करणनामको भवति । अनुलोमविवाहविधिः शास्त्रोक्तविधिर्मन्यते । अत्र निर्दिष्टा मूर्धावसिक्ताम्वष्ठ-निषाद-माहिष्योग्र-करणाः षडनुलोमजाः पुत्राः कथिताः सन्ति । तेषां वर्णनां जातिविभाजनमन्तर्जातीयाविवाहानामाधारेण विहितमस्ति ।

विप्रान्मूर्घावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् ।
अम्बष्ठः शूद्रयां निषादो जातः पारशवोऽपि वा ॥
वैश्याशुद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ ।
वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः ॥ (याज्ञवल्क्यः, २००२, १।९१-९२)

अनुलोमविवाहे ब्राह्मणस्य क्षत्रियादित्रयस्त्रीषु, क्षत्रियस्य वैश्यादिवर्णयोः स्त्रियोः वैश्यश्य च शूद्रायां जातानां पुत्राणामपि निन्दा विहिता वर्तते ।

विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन्षडेतेऽपसदाः स्मृताः ॥ (मनुः, २०४९, १०।१०)

सवर्णानां सजातीनां महत्त्वं धार्मिकक्षेत्रे दायविभागविषये च प्रकाशितं वर्तते । तेषां विविधानं वर्णानां जातीनां भेदनिरूपणमनुलोमादीनां प्रतिलोमादीनाञ्चाधारेण क्रियते ।

**प्रतिलोमजाः पुत्राः**

ब्राह्मण्यां क्षत्रियाज्जातः सूताख्यः पुत्रो भवति । एवं वैश्याद्वैदेहकः,शूद्रात्तु चण्डालनामकः पुत्रो जायते । धर्मशास्त्रे चण्डालः खलु सर्वधर्मबहिष्कृतो मन्यते । प्रतिलोमविधिना क्षत्रिया वैश्यान्मागधनामकं पुत्रं जनयति । तस्यां क्षत्रियायां शूद्रात्क्षत्ताराख्यः पुत्रो जायते । एवं शूद्रादेव वैश्ययोषिदायोगवं पुत्रं जनयति । अत्र निरूपिताः सूतवैदेहक-चण्डाल-मागध-क्षत्राऽयोगवाः षट् पुत्राः प्रतिलोमजाः सन्ति । यद्यपि शास्त्रेषु प्रतिलोमविवाहो निषिद्धो मन्यते तथापि लोके कामजाख्याः प्रतिलोमजाः पुत्रा भवन्ति ।

ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा ।
शूद्राज्जातस्तु चण्डालः सर्वधर्मबहिष्कृतः ॥
क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च ।
शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥ (याज्ञवल्क्यः, २००२, १।९३-९४)

प्रतिलोमजाः सूतवैदेहकादयः षट् प्रतिलोमजाः पुत्राः परस्परजातीयासु भार्यासु सुबहूनानुलोम्येऽप्यधिकदुष्टान् सत्क्रियाबहिर्भूतान् हीनतरान् पुत्राञ्जनयन्ति । शास्त्रोक्तविवाहनियमान्

परित्यज्य प्रतिकुलं वर्तमानाः प्रतिलोमजा द्विजप्रतिलोमजेभ्यो निकृष्टतरा मन्यन्ते ।

यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते ।
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते ॥
प्रतिकुलं वर्तमाना बाह्या बाह्यतरान्पुनः ।
हीना हीनान्प्रसूयन्ते वर्णान्पञ्चदशैव तु ॥ (मनुः, २०४९, १०।३०-३१)

ते शास्त्रोक्तविवाहनियमबाह्याः प्रतिलोमजाः चातुर्वर्ण्यबाह्याश्चण्डालक्षत्रायोगवाः शूद्राज्जातास्त्रयश्चातुर्वर्ण्यं गच्छन्तः आत्मनो हीनतरान् परस्परापेक्षयापकृष्टोत्कृष्टवर्णप्रभवत्वात्पञ्चदशवर्णाञ्जनयन्ति ।

**संकीर्णसंकरे जात्यन्तरस्वरूपनिदर्शनम्**

ब्राह्मणाच्छूद्रकन्यायां निषादाख्यः पुत्र उत्पद्यते, एवं निषाढाच्छूद्रायां पुक्कसनामकः पुत्रो जायते, पुनश्च निषाद्यां शूद्राज्जातो जात्या कुक्कुटको भवति । तथा च शूद्रात्क्षत्रियायां जातः पुत्रः क्षत्ता कथितः, उग्रकन्यायां (क्षत्रियेण शूद्रायां जात उग्रः) क्षत्तुर्जातः श्वपाक उच्यते, एवं वैदेहकेन (वैश्याद्ब्राह्मण्यां जातो वैदेहको भवति) चाम्बष्ठ्यामुत्पन्नः (ब्राह्मणाद्वैश्यकन्यायामम्बष्ठः) पुत्रो वेण कथ्यते ।

जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ।
शूद्राज्जातो निषाधां तु स वै कुक्कुटकः स्मृतः ॥
क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते ।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥ (मनुः, २०४९, १०।१८-१९)

द्विजातयः (क्षत्रियजातयः) उपनयनादिक्रियालोपेन यजनाध्ययनप्रायाश्चित्तादीनाञ्चाभावेन लोके शनैः शनैः शूद्रतां गच्छन्ति । शास्त्रेषु विशेषेण पौण्ड्रादि देशोद्भवाः पौण्ड्रक-चौड्र-द्रविड-काम्बोज-यवन-शक-पारद-पल्हव-चीन-किरात-दरद-खशाः क्रियालोपादिना शूद्रत्वमापन्ना मन्यन्ते ।

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ।
पारदाः पल्हवाश्चीनाः किराता दरदाः खसाः ॥ (मनुः, २०४९, १०।४३-४४)

एवं दस्युरायोगवस्त्रीजातौ (ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रियालोपादिना म्लेच्छभाषायुक्ता आर्यभाषोपेता वा बाह्या जातयो जायन्ते, ते च दस्यवः कथिताः) (मनुः, २०४९, १०।४५) सैरिन्ध्रनामानं (दासकर्मजीवनं वा देवपित्रौषधार्थं पाशबन्धनेन मृगादिवधाख्यवृत्त्यन्तरजीवनमस्योक्तम्)जनयति (मनुः, २०४९, १०।३२)

वैदेह आयोगव्यां मैत्रेयकं (यश्च प्रातर्घण्टामाहत्य नृन्सततं वृत्यर्थे स्तौति) समुत्पादयति । (मनुः, २०४९, १०।३३) निषाद आयोगव्यां मार्गवं (नौकर्म-जीविनं कैवर्तनाम्ना प्रसिद्धम्) जनयति । (मनुः, २०४९, १०।३४) एवमेव निषादाद्वैदेह्यां चर्मकारो (लोके 'चमार' इति नाम्ना प्रसिद्धः) जायते । वैदेहकादेव निषादस्त्री अन्ध्रनामकं पुत्रमुत्पादयति, तथैव कारावरस्त्रीजातौ स एव (वैदेहकः) मेदनामानं जनयति । (मनुः, २०४९,

१०।३६) चण्डालेन पुक्कस्यां (निषादाच्छूद्रायां जातः पुक्कसो भवति) जातः सोपाकाख्यः (मारणोचितापराधे राजादेशेन मारणकार्यमेव तस्य वृत्तिर्भवति) (मनुः, २०४९, १०।३८, टीका) पापपुरुषो जायते । निषादी (निषादस्त्री) चण्डालादन्त्यवसायिसंज्ञं चण्डालादिभ्योऽपि गर्हितं श्मशानवासिनं पुत्रं जनयति । (मनुः, २०४९, १०।३९) वैदेह्यां चण्डालात्पाण्डुसोपाकाख्यो (वेणुव्यवहारजीवी) पुत्रो जायते । एवं निषादेन वैदेह्यामेवाहिण्डिको पुत्रः समुत्पद्यते । (मनुः, २०४९, १०।३७) 'ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः' इति वचनादेव वर्णेषु ब्राह्मण-क्षत्रिय-वैश्यादीनां वर्णत्रयाणमेव द्विजत्वमुक्तम् । तत्र समानजातीयासु भार्यासु जाता ब्राह्मणादयस्त्रयो वर्णाः, तथा द्विजातिषु चानुलोम्येनोत्पन्नाः (ब्राह्मणेन क्षत्रियावैश्ययोः क्षत्रियेण वैश्यायामेवं) षट् पुत्राः खलु द्विजधर्मिणो भवन्ति, तेषां (३+३ = ६) सर्वेषां द्विजधर्मीणामुपनयनादिषु वैदिकसंस्कारेषु पूर्णरूपेणाधिकारः प्रदर्शितः ।

अनुलोमविवाहेऽपि द्विजातीनामनन्तरैकान्तरद्व्यन्तरजातिस्त्रीषु समुत्पन्नाः पुत्रा हीनजातिमातृदोषयुक्ता मातृजातिसंस्कारादिधर्मिणो भवन्ति ।

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ।
ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते ॥ (मनुः, २०४९, १०।१४)

## जात्यन्तरजातानां कर्माणि

वर्णसंकरादिना जात्यन्तरेषु अपसदा (द्विजानामानुलोम्येनोत्पन्नाः) अपध्वंसजाश्च (प्रतिलोमजाः) पुत्रा जायन्ते । वर्णसंकरजातीनां जीवनार्थं महर्षिभिर्निन्दितकर्माणि निर्देशितानि । तेन तेषां जीवनयापनं द्विजात्युपकारकैर्निन्दितकर्मभिर्विधीयते ।

ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः ।
ते निन्दितैर्वर्तयेयुर्द्विजानामेव कर्मभिः ॥ (मनुः, २०४९, १०।४६)

तत्र वर्णसंकरजातीनां कर्मसु सूतानामश्वसारथ्यं, वैदेहकानां नारीसंरक्षणार्थमन्तः पुररक्षणम्, अम्बष्ठानां चिकित्सनम्, मागधानां क्रयविक्रयादीनामापणव्यवस्थापनमुक्तम् । निषादानां मत्स्यवधः, मद्गुमेदान्ध्रचुञ्चूनां काननपशुमारणम्, आयोगवानां काष्ठतक्षणकार्यं निर्देशितमस्ति । एवं वेणानां कांस्यमुरजादिवाद्यभाण्डवादनम् क्षत्त्रुग्रपुक्कसादयो जातयो बिलिनिवासिनां गोधादीनां जीवजन्तुनां वधबन्धनादीनि शास्त्रेषु निर्देशितानि कार्याणि कुर्वन्ति ।

सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सनम् ।
वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ॥
मत्स्यघातो निषादानां तष्टिस्त्वायोगवस्य च ।
मेदान्ध्रचुञ्चुमद्गूनामरण्यपशुहिंसनम् ॥
क्षत्त्रुग्रपुक्कसानां तु बिलौकोबधबन्धनम् ।
धिग्वणानां चर्मकार्यं वेणानां भाण्डवादनम् ॥ (मनुः, २०४९, १०।४७-४९)

चण्डालश्वपाकादीनां जनानां निवासो ग्रामाद्बहिर्निर्देशितो विद्यते । लोहादिष्वपपात्रेषु तेषां भोजनमुक्तं वर्तते । तैर्भुक्तं पात्रं संस्कृत्यापि न व्यवहर्त्तव्यं, वासांसि च शववस्त्राणि निर्देशितानि । अलङ्करणमपि लौहनिर्मितमेव कथितमस्ति । अन्नादीनां सञ्चयार्थं दिवा नगरेषु ग्रामेषु च भ्रमण कार्यं तेषां निरूपितं

वर्तते ।

चण्डालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः ।
अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभम् ॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलंकारः परिव्रज्या च नित्यशः ॥ (मनुः, २०४९, १०।५१-५२)

**वर्णानामापद्वृत्तयः**

धर्मशास्त्रोक्तकर्मणा नित्यकर्मानुष्ठानकुटुम्बसंवर्धनपूर्वकं ब्राह्मणो जीवितुमशक्नुवन्नापदि क्षत्रियकर्मणा, क्षत्रियो वैश्यकर्मणा तथा वैश्योऽपि शूद्रकर्मणा स्थातुं शक्नोति । परवृत्तीनामनुसरणञ्चापत्कालपर्यन्तमेव विहितं न सार्वकालिकमिति ।

अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा ।
जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोऽपि वा ।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ।
वैश्योऽजीवन्स्वधर्मेण शूद्रवृत्त्यापि वर्तयेत् ।
अनाचरन्नकार्याणि निवर्तेत च शक्तिमान् ॥ (मनुः, २०४९, १०।८१,८३,९८)

एवं शूद्रोऽपि स्ववृत्त्या (द्विजातीनां शुश्रूषाम विधाय) जीवितुमक्षमो भवति चेत् कारुककर्मभिस्तथा तक्षणशिल्पचित्रलिखितादिभिर्विविधकर्मभिस्तेषामेव शुश्रूषां विधाय जीवेदिति शास्त्रस्य मर्यादा वर्तते ।

अशक्नुवंस्तु शुश्रूषा शूद्रः कर्तुं द्विजन्मनाम् ।
पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः ॥ (मनुः, २०४९, १०।९९)

आपदि शूद्रो द्विजातीनां हितमाचरन् वणिग्वृत्त्याऽपि जीवितुं शक्नोतीति याज्ञवल्क्यस्य कथनमस्ति ।

शूद्रस्य द्विजशुश्रूषा तयाऽजीवन्वणिग्भवेत् ।
शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥ (याज्ञवल्क्यः, २००२, १।१२०)

गृहस्थानां सर्वेषां वर्णानां कृते स्वविशेषकर्माणि शास्त्रेषु प्रतिपादितानि सन्ति । तथाऽपि वृत्त्यर्थमापदि कृषौ प्रवृत्तस्य ब्राह्मणस्य तस्मिन् कर्मणि महान्दोषः प्रदर्शितः । मत्स्यघाती शाकुनिको वा संवत्सरेण यत्पापं प्राप्नोति तदयोमुखेन हलेन भूमिं भिदन्नेकाहेन कर्षकः प्राप्नोतीति । कर्षको लाङ्गलमाध्यमेन भूमौ स्थितानामनेकेषां कृम्यादीनां छेदनभेदनहननैर्यानि पापानि करोति, तस्य तेषां पापानां प्रायश्चित्तं खलयज्ञेन क्रियते ।

वृक्षं छित्त्वा महिं भित्त्वा हत्वा च कृमिकीटकान् ।
कर्षकः खलयज्ञेन सर्वपापैः प्रमुच्यते ॥ (पराशरः, १९१३, २।१०)

तत्र प्राणयात्रार्थं ब्राह्मणादीनां चतुर्णां वर्णानां दायाद्याः सप्त धनागमा धर्म्या मन्यन्ते । एवमापदि तेषां वर्णानां कृते दश जीवनहेतवश्च शास्त्रेषु प्रदर्शिताः सन्ति ।

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।

प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥
विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः ।
धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः ॥ (मनुः, २०४९, १०।११५-११६)

वृत्तिसंयमान्वितस्य पञ्चस्वग्निषु होमं कुर्वाणस्य नैष्ठिकद्विजस्यापि पञ्चाग्निहोमार्जितपुण्यमनर्चितोऽतिथिर्गृह्णाति ।

शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः ।
सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन् ॥ (मनुः, २०४९, ३।१००)

पञ्चाग्निपूजनशीलो गृहस्थो द्विजादिवर्णो ब्राह्मे मुहूर्ते सदैवोत्थाय कृतानि, करिष्यमाणानि कर्माणि च चिन्तयेत् । आत्मनो हितं कांक्षन् यथासमये शास्त्रविहितान् धर्मार्थकामान् न परित्यजेत् ।

ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।
धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत् ॥ (याज्ञवल्क्यः, २००२, १।११५)

एवं शास्त्रोक्तानि कर्माणि कृत्वा दिवसस्य पूर्वाह्णादीन् त्रीन्भागान् सफलानेव कुर्यात् । वर्णानां सर्वोत्कृष्टं कर्म यज्ञानुष्ठानमेव दृश्यते । यज्ञादेव तृप्ताश्च ते देवाः मनुष्याणां संरक्षणं कुर्वन्ति । तस्मादेव देवमनुष्ययोः परस्परसम्बन्धो जायते ।

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ (श्रीमद्भगवद्गीता, २०५८, ३।११)

जायमानो मनुष्य त्रिभिः स्वयमेव ऋणवान् भवति । जना तान्यृणानि चोपनयनादारभ्य गृहस्थाश्रमे गत्वा संशोधयन्ति ।

कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां मनुष्याणां ऋणसंयोगो त्रिभिर्भवतीति विषयस्य प्रतिपादनं विहितमस्ति । "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः " । (तैत्तिरीयसंहिता, १९८३, ६।३।१०)

ब्राह्मणादीनां वर्णानां तान्यृणानि प्रजया यज्ञैश्चापाक्रियन्ते नान्यथा । यज्ञयागादिभिर्विहिता धर्मपरम्परा प्रजामुत्पाद्य सदैवाविच्छिन्नरूपेण प्रचलति । तेन पुत्रस्य महत्त्वं सर्वोत्कृष्टं वर्तते । पुत्रः पुंनाम्नो नरकात् पितरं त्रायते, तस्मात्कारणादपि ब्रह्मणा पुत्र इति कथितः ।

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥
पुंनाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः ।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ (मनुः, २०४९, ९।१३७-१३८)

## निष्कर्षः

वर्णव्यवस्था वेदेषु प्रतिपादिता वैदिकी व्यवस्था वर्तते । वेदमनुसृत्य रचितानां धर्मशास्त्रपुराणमहाभारतरामायणादीनां वैदिकग्रन्थानां विविधभागेषु च वर्णव्यवस्थाया वर्णनं विहितं दृश्यते । तेषां ग्रन्थानामाधारेण वैदिकवर्णव्यवस्था लोके वर्तमानवस्थायामपि परम्परागतरूपेण परापूर्वकालादेव

प्रचलिता वर्तते । अस्यां व्यवस्थायां ब्राह्मणक्षत्रियवैश्यशूद्रादीनां चतुर्णां वर्णानां कर्माणि पृथक् पृथक् रूपेण प्रतिपादितानि सन्ति । तत्र सर्वेषां वर्णानां विवाहविधिश्च वर्णानुरूपेण विहितोऽस्ति । तेषां वर्णानां शास्त्रोक्तकर्मणा जीवनयापनमेव इहामुत्र च फलदायकं मन्यते । अन्यथा जात्यन्तरेषु पतनं निकृष्टकर्मणा जीवनं तेषां भवतीति धर्मशास्त्रस्य मर्यादा वर्तते । तेन वर्णव्यवस्थायां धर्मस्य धर्मशास्त्रस्य च स्थानं सर्वोपरि विद्यते ।

**कृतज्ञताज्ञापनम्**

आलेखेऽस्मिन् वैदिकग्रन्थानामाधारेण वर्णधर्मस्यानुसन्धानात्मकमध्ययनं विहितमस्ति । अस्य सम्पादनक्रमे धर्मशास्त्रीयं गभीरमध्ययनं विधाय सूक्ष्मरूपेण सम्परीक्ष्य यथावश्यकं परामर्शदातृभ्यो विज्ञमहोदयभ्यः कृतज्ञतां व्यनज्मि ।

**सन्दर्भग्रन्थाः**

*ऋग्वेद-संहिता* (२०६३) विद्यार्थी पुस्तक भण्डार ।

*कृष्णयजुर्वेदीय तैत्तिरीयसंहिता* ( ई.१९८३). स्वाध्यायमण्डल ।

पराशरः (ई.१९१३). *पराशरस्मृतिः* ओलोषी प्रसाद ।

बौधायनः (२०२९). *बौधायनधर्मसूत्रम्.* चौखम्बा संस्कृत सीरीज आफिस ।

*मत्स्यमहापुराणम्* (२०७३).गीताप्रेस ।

मनुः (२०४९).*मनुस्मृतिः* चौखम्भा संस्कृत संस्थान ।

याज्ञवल्क्यः (ई.२००२). *याज्ञवल्क्यस्मृतिः* चौखम्बा संस्कृत प्रतिष्ठान ।

वासिष्ठः (१९३०). *वासिष्ठधर्मशास्त्रम्* बी.ओ.आर.आई.इन्स्टिच्यूट ।

*शतपथब्राह्मणम्* (२०५४).चौखम्भा संस्कृत संस्थान ।

शङ्खः (२०७८). *शङ्खस्मृतिः* प्राप्ति शर्मा ।

*श्रीमद्भगवद्गीता* (२०५८) गीताप्रेस ।

*श्रीमद्भागवतमहापुराणम्* (२०२२). गीताप्रेस ।

*श्रीशिवमहापुराणम्* (२०७४).गीताप्रेस ।

सत्याषाढः (खि.१९३२).*सत्याषाढविरचितं श्रौतसूत्रम्* विनायक गणेश आपटे ।